महाकविकालिदासप्रणीतम्

# कुमारसम्भवमहाकाव्यम्

मल्लिनाथकृतसञ्जीविनी, चरित्रवर्धनकृतशिशुहितैषिणी,
सीतारामकृतसञ्जीविनीतिटीकात्रयतिलकितम्।


राष्ट्रियसंस्कृतसंस्थानम्
(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)
नवदेहली

महाकविकालिदासप्रणीतम्

# कुमारसम्भवमहाकाव्यम्

मल्लिनाथकृतसञ्जीविनी, चरित्रवर्धनकृतशिशुहितैषिणी,
सीतारामकृतसञ्जीविनीतिटीकात्रयतिलकितम्।

राष्ट्रियसंस्कृतसंस्थानम्
(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)
नवदेहली

The firm will replace the copy/copies free of cost if any defect is found.

प्रकाशक:
कुलसचिव:
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानितविश्वविद्यालय:)
56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058
ईपीएबीएक्स : 28524993, 28521994, 28524995
ई मेल : rsks@nda.vsnl.net.in
वेबसाईट : www.sanskrit.nic.in

© राष्ट्रियसंस्कृतसंस्थानम्

प्रथमं संस्करणम् : 1898
द्वितीयं पुनर्मुद्रितं संस्करणम् : 1989
तृतीयं पुनर्मुद्रितं संस्करणम् : 2005
चतुर्थं पुनर्मुद्रितं संस्करणम् : 2018

मूल्यम् : ₹ 170.00

मुद्रक:
**डी.वी. प्रिंटर्स**
97-यू.बी., जवाहर नगर, दिल्ली-110007

# किञ्चिन्निवेदनम्

'कुमारसम्भवमहाकाव्यम्' इत्याख्यस्य महाकविकालिदास-प्रणीतस्य लोकाभिरामग्रन्थस्य चतुर्थं पुनर्मुद्रितं संस्करणं प्रकाशयद् राष्ट्रियसंस्कृतसंस्थानकुटुम्बम् अतितरामानन्दमनुभवति। अस्य ग्रन्थस्य त्रिषु पूर्वसंस्करणेषु प्रकाशितानां प्रतिलिपीनाम् विद्वद्भि: स्वीकरणेनाऽस्माकं ग्रन्थविक्रयभाण्डागारे एतत्पुस्तकविषयिणी रिक्तता समजनि। तथ्यमिदं ग्रन्थस्यास्य सुध्युपास्यताम् अभिव्यनक्ति। अनुसन्धानपरायणानां विद्यार्थिनां सुधीमतल्लिकानाञ्चाग्रहमुररीकृत्यास्माभि: चतुर्थं संस्करणम् अस्य ग्रन्थस्य प्रस्तूयते।

आशासे यत्सुप्रथितं महाकव्यमिदं यथा पूर्वं तथाऽस्मिन्नपि पर्याये विपश्चितां हृदि स्थानमवाप्स्यति सुरभारतीसमुपासकानां च प्रकामं मार्गदर्शनं विधास्यति। ग्रन्थस्यास्य पुनर्मुद्रणपुण्यपर्वणि प्रत्तसाहाय्येभ्य: शोधप्रकाशनप्रमुखमुखेभ्य: सर्वेभ्य: संस्थानकुटुम्बसदस्येभ्यो मुद्रकाय च भूरिशो धन्यवादान् प्रयच्छामि।

**–प्रो. परमेश्वरनारायणशास्त्री**

# प्रस्तावना ।

इह खलु संस्कृतभाषायां व्युत्पित्सूनामन्तेवासिनां सत्स्वपि परःशतेषु काव्येषु पंचमहाकाव्येष्वेव महान्समादरो दृश्यते। तत्रापि महाकविकालिदासप्रणीतेषु काव्यनाटकादिषु पिपठिषूणां सहृदयाणां चातीव प्रवृत्तिर्वर्तते। नहि केवलमध्ययनपटवो बटवः कालिदासविरचितगद्यपद्यैर्भारतमेव मुखरीकुर्वन्ति। किन्तु कालिदाससूक्तिसुधारसास्वादमोदमानस्वान्ता विघूर्णितशिरस आकुलभौमा अपि विगलितवेद्यान्तरमानन्दमनुभवन्ति ।

महाकवेः कालिदासस्य कृतिषु रसनिर्भरता, अलंकारवैशद्यम्, अर्थगांभीर्यम्, सुकुमारपदविन्यासश्चेति सन्ति वहवो गुणाः। यस्य सुभाषितपीयूषपानगलिताखर्वगर्वा महाकवयोऽप्येकपदे तस्य कवेः कविकुलगुरुत्वमापादयन्तस्तस्य कृतेरलौकिकतां स्वीकुर्वन्ति। भगवता बाणभट्टेन कालिदासस्य कृतेर्माधुर्यमास्वाद्य मुक्तकंठेनोक्तम्।

"निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु। प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते॥'

एवं गुणगणगरिष्ठस्य कविकुललब्धप्रतिष्ठस्य तत्रभवतः कालिदासस्य यशःकायकल्पा बहवः प्रबन्धाः पृथक् पृथक् मुद्रितास्सन्ति मुद्र्यन्ते च । तथापि काव्यपीयूषपानलोलुपानां केषांचन सहृदयानां पुनःपुनरभ्यर्थनया गुर्जरपत्रालयाधिपतिना कालिदासीयप्रबन्धरत्नानि क्रमशः प्रकटीकर्तुमुपक्रान्तम्। तत्र विक्रमार्के १९५४ मिते वत्सरे रघुवंशाख्यं महाकाव्यं मल्लिनाथकृतटीकासंवलितं ललिताक्षरसंकलितं प्राकाशि। इदानीं च तेनैव कुमारसंभवाख्यं महाकाव्यं **श्रीमल्लिनाथकृतसञ्जीविनी, सीतारामकृतसञ्जीविनी, चारित्रवर्धनकृताशिशुहितैषिणी**ति टीकात्रयतिलकितं प्रकाश्यते। श्रीमल्लिनाथसीतारामकृतटीके तु सुलभे बहुभिरेव मुद्रिते स्तः।परन्तु चारित्रवर्धनकृता शिशुहितैषिणी टीकेदानीमपि न केनाप्युपलभि।महादुर्लभा सा शिशुहितैषिणीटीका तेनैव महता प्रयत्नेन सम्पादिता, साच श्लोकाभिप्रायं स्पष्टतया विशदीकरोति पदार्थश्चानिर्वक्ति, अतो शिशुहितैषिणी व्युत्पित्सूनामतीवोपकारिणीति सम्प्रधार्य महता प्रयत्नेन तस्याः शीर्णपत्रामेकामतीवाशुद्धां प्रतिकृतिं संपाद्य शास्त्रीश्री **धुण्डिराजात्मज विठ्ठलद्वारा** संशोधयित्वा टीकात्रयतिलकितं कुमारसंभवं मुद्रितम् ।

विदुषा मल्लिनाथेन विरचिता सञ्जीविनी प्रथमसर्गादारभ्य अष्टमसर्गपर्यन्तमुपलभ्यते। सीतारामविरचिता सञ्जीविनीटीका चाष्टमसर्गादारभ्यान्तिमसर्गपर्यन्तं वर्तते ।
चारित्रवर्द्धननिर्मिता शिशुहितैषिणी च प्रथमसर्गात्सप्तमसर्गावधि समुपलभ्यते ।

न्यासमाह । ईप्सितार्थस्थिरनिश्चयममीष्टार्थकरणनिष्ठं मनश्चित्तं निम्नाभिमुखं गम्भीराभिमुखं पयस्तोयं कः प्रतीपयेत् व्यावर्तयितुं शक्नुयात् । अपितु न कोपि प्रतीपयेदिति । प्रतीपं करोतीत्यर्थे णिच् ॥ ५ ॥

**कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी ।**
**अयाचतारण्यनिवासमात्मनः फलोदयान्ताय तपःसमाधये ॥ ६ ॥**

**( म० टी० ) कदाचिदिति ।** अथ कदाचिन्मनस्विनी स्थिरचित्ता सा पार्वती मनोरथज्ञमभिलाषाभिज्ञं पितरं हिमवन्तमासन्नसख्यासन्नसखी सैव मुखमुपायः । ‘ मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि ’ इति विश्वः । तेन । फलोदयः फलोत्पत्तिरन्तोऽवधिर्यस्य तस्मै तपःसमाधये तपोनियमार्थमात्मनः स्वस्यारण्यनिवासं वनवासमयाचत । ‘ दुह्याच् ’ इत्यादिना द्विकर्मकत्वम् ॥ ६ ॥

**( चा० टी० ) कदाचिदिति ।** सा मनस्विनी साभिमाना मनोरथज्ञं हरप्राप्तिलक्षणाभिलाषविदं पितरं आसन्नसखीमुखेन निकटसखीद्वारा आत्मनोऽरण्यनिवासं वनवासं तपःसमाधये तपःप्राप्त्यर्थं यः समाधिस्तस्मै अयाचत याचितवती । कीदृशाय । फलोदयान्ताय फलस्य उदय उत्पत्तिरन्तोऽवधिर्यस्य तस्मै ॥ ६ ॥

**अथानुरूपाभिनिवेशतोषिणा कृताभ्यनुज्ञा गुरुणा गरीयसा ।**
**प्रजासु पश्चात्प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत् ७**

**( म० टी० ) अथेति ।** अथ गौर्यनुरूपेण योग्येनाभिनिवेशेनाग्रहेण तुष्यतीति तथोक्तेन गरीयसा पूज्यतमेन गुरुणा पित्रा कृताभ्यनुज्ञा तपः कुर्विति कृतानुमतिः सती पश्चात्तपःसिद्ध्युत्तरकालं प्रजासु जनेषु तदाख्यया तस्या गौर्याः संज्ञया प्रथितम् । गौरीशिखरमिति प्रसिद्धमित्यर्थः । शिखण्डिमत् । न तु हिंस्रप्राणिप्रचुरमिति भावः । शिखरं शृङ्गं जगाम ययौ ॥ ७ ॥

**( चा० टी० ) अथेति ।** अनन्तरं गौरी शिखरं जगाम । कीदृशं शिखरं । शिखण्डिमत् शिखण्डिनो मयूरास्तद्युक्तं । कीदृशी गौरी । गुरुणा पित्रा कृताभ्यनुज्ञा । कीदृशेन गुरुणा । अनुरूपाभिनिवेशतोषिणा अनुरूपो योग्यो योभिनिवेशः शंभुप्राप्तिलक्षण आग्रहस्तेन तुष्टेन । पुनः कीदृशेन । गरीयसा पूज्येन । कीदृक् शिखरं । प्रजासु लोकेषु पश्चाद्गौरीतपश्चरणानन्तरं तदाख्यया तस्या गौर्या आख्यया नाम्ना प्रथितं विख्यातम् ॥ ७ ॥

**विमुच्य सा हारमहार्यनिश्चया विलोलयष्टिप्रविलुप्तचन्दनम् ।**
**बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥ ८ ॥**

**( म० टी० ) विमुच्येति ।** अहार्यनिश्चयानिवार्यनिश्चया सा गौरी विलोलाभिश्चलाभिर्यष्टिभिः प्रतिसरैः प्रविलुप्तं प्रमुष्टं चन्दनं स्तनान्तरगतं येन तं तथोक्तं हारं मुक्तावलीं विमुच्य विहाय बालारुणबभ्रु बालार्कपिङ्गलं पयोधरयोः स्तनयोरुत्सेधेनोच्छ्रायेण विशीर्णा विघटिता संहतिरवयवसंश्लेषो यस्य तत्तथोक्तं वल्कलं कण्ठलम्बि स्तनोत्तरीयभूतं बबन्ध धारयामासेत्यर्थः ॥ ८ ॥



**( चा० टी० ) विमुच्येति ।** सा बाला गौरी हारं मुक्ताकलापं विमुच्योत्तार्य तदास्यः हारस्थाने वल्कलबन्धं निहितवती । कीदृशं हारं । क्रीडावशाद्विलोलाश्चञ्चला या यष्ट्यो हारलता मौक्तिकपङ्क्तयस्ताभिः प्रविलुप्तचन्दनमङ्गरागो यस्मिंस्तम् । कीदृशं वल्कलं । बालारुणबभ्रु नवोदितोनूरुकपिशं । पुनः कीदृक् । पयोधरयोः स्तनयोर्य उत्सेध उच्छ्रायस्तेन विशीर्णा त्रुटयन्ती संहतिः सन्धिबन्धो यस्मिंस्तत् । एतेन हारेणेव वल्कलेनापि शोभाऽभूदित्यर्थः । कीदृशी सा । अहार्यनिश्चयाऽहार्यो हर्तुमशक्यो निश्चयो यस्याः सा ॥ ८ ॥

**यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।**
**न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥ ९ ॥**

**( म० टी० ) यथेति ।** तस्या देव्या आननं तदाननं प्रसिद्धैर्भूषितैः । ‘ प्रसिद्धौ ख्यातभूषितौ ’ इत्यमरः । रोहन्तीति रुहाः । “ इगुपधज्ञाप्रीकिरः कः ” इति कप्रत्ययः । शिरसि रुहास्तैः शिरोरुहैर्मूर्द्धजैर्यथा मधुरं प्रियमभूत् । ‘ स्वादुप्रियौ तु मधुरौ ’ इत्यमरः । जटाभिरप्येवं मधुरमभूत् । तथाहि । पङ्कजं पद्मं षट्पदश्रेणिभिर्भ्रमरपङ्क्तिभिरेव न किंतु सह शैवलासङ्गेन सशैवलासङ्गमपि । “ तेन सहेति तुल्ययोगे ” इति बहुव्रीहिः । प्रकाशते । शैवलेनापि शोभत एवेत्यर्थः ॥ ९ ॥

**( चा० टी० ) यथेति ।** प्रसिद्धैर्विख्यातैः शिरोरुहैः केशैर्यथा तदाननं तस्या मुखं मधुरं रम्यं तथा जटाभिरपि रम्यमभूत् । उक्तमर्थं दृष्टान्तेन द्रढयति । पङ्कजं षट्पदश्रेणिभिरेव परं केवलं न प्रकाशते । किंतु सशैवलासङ्गमपि शैवालसंपर्कसहितमपि शोभते ९

**प्रतिक्षणं सा कृतरोमविक्रियां व्रताय मौञ्जीं त्रिगुणां बभार याम् ।**
**अकारि तत्पूर्वनिबद्धया तया सरागमस्या रसनागुणास्पदम् ॥ १० ॥**

**( म० टी० ) प्रतीति ।** सा देवी प्रतिक्षणं क्षणे क्षणे कृतरोमविक्रियां पारुष्यात्कृतरोमाञ्चां त्रिगुणां त्रिरावृत्तां यां मौञ्जीं मुञ्जमयीं मेखलां व्रताय तपसे बभार । तदेव पूर्वं प्रथमं यस्य तत्पूर्वं यथा तथा निबद्धया तया मौञ्ज्यास्या देव्या रसनागुणस्यास्पदं स्थानं जघनम् । सह रागेण सरागं सलोहितमकारि कृतम् । सौकुमार्यातिशयादिति भावः १०

**( चा० टी० ) प्रतिक्षणमिति ।** प्रतिक्षणं मुहुर्मुहुर्व्रताय व्रतार्थं कृतरूपविक्रिया कृततापसवेषा सा गौरी त्रिगुणां त्रिरावृत्तां यां मौञ्जीं मुञ्जरज्जुं बभार दधौ । तया मौञ्ज्या अस्या देव्या रसनागुणास्पदं काञ्चीगुणस्थानं सरागं लोहितमकारि कृतं । मौञ्ज्याः कर्कशत्वात्प्राग्प्रतिबन्धनत्वाच्चारुणतापादनं । कीदृश्या तया । तत्पूर्वनिबद्धया प्रथमं बद्धया ॥ १० ॥

**विसृष्टरागादधरान्निवर्तितः स्तनाङ्गरागारुणिताच्च कन्दुकात् ।**
**कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥ ११ ॥**

**( म० टी० ) विसृष्टेति ।** तया देव्या विसृष्टरागात्त्यक्तलाक्षारसरञ्जनादधरादधरोष्ठान्निवर्तितः । ‘ निसृष्टरागात् ’ इति पाठे नितरां त्यक्तलाक्षारागात् । रागत्यागेन निष्प-